श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चषष्टितमः सर्गः ॥

## वाल्मीकिना शत्रुघ्नं प्रति सौदासस्य कल्माषपादस्य कथायाः श्रावणम्

प्रस्थाप्य च बलं सर्वं मासमात्रोषितः पथि।
एक एवाशु शत्रुघ्नो जगाम त्वरितं तदा॥ **7.65.1** ॥

द्विरात्रमन्तरे शूर उष्य राघवनन्दनः।
वाल्मीकेराश्रमं पुण्यमगच्छद् वासमुत्तमम्॥ **7.65.2** ॥

सोऽभिवाद्य महात्मानं वाल्मीकिं मुनिसत्तमम्।
कृताञ्जलिरथो भूत्वा वाक्यमेतदुवाच ह॥ **7.65.3** ॥

भगवन् वस्तुमिच्छामि गुरोः कृत्यादिहागतः।
श्वः प्रभाते गमिष्यामि प्रतीचीं वारुणीं दिशम्॥ **7.65.4** ॥

शत्रुघ्नस्य वचः श्रुत्वा प्रहस्य मुनिपुङ्गवः।
प्रत्युवाच महात्मानं स्वागतं ते महायशः॥ **7.65.5** ॥

स्वमाश्रममिदं सौम्य राघवाणां कुलस्य वै।
आसनं पाद्यमर्घ्यं च निर्विशङ्कः प्रतीच्छ मे॥ **7.65.6** ॥

प्रतिगृह्य तदा पूजां फलमूलं च भोजनम्।
भक्षयामास काकुत्स्थस्तृप्तिं च परमां गतः॥ **7.65.7** ॥

स भुक्त्वा फलमूलं च महर्षिं तमुवाच ह।
पूर्वा यज्ञविभूतीयं कस्याश्रमसमीपतः॥ **7.65.8** ॥

तत् तस्य भाषितं श्रुत्वा वाल्मीकिर्वाक्यमब्रवीत्।
शत्रुघ्न शृणु यस्येदं बभूवायतनं पुरा॥ **7.65.9** ॥

युष्माकं पूर्वको राजा सुदासस्तस्य भूपतेः।
पुत्रो वीरसहो नाम वीर्यवानतिधार्मिकः॥ **7.65.10** ॥

स बाल एव सौदासो मृगयामुपचक्रमे।
चञ्चूर्यमाणं ददृशे स शूरो राक्षसद्वयम्॥ **7.65.11** ॥

शार्दूलरूपिणौ घोरौ मृगान् बहुसहस्रशः।
भक्षमाणावसन्तुष्टौ पर्याप्तिं नैव जग्मतुः॥ **7.65.12** ॥

स तु तौ राक्षसौ दृष्ट्वा निर्मृगं च वनं कृतम्।
क्रोधेन महताविष्टो जघानैकं महेषुणा॥ **7.65.13** ॥

विनिपात्य तमेकं तु सौदासः पुरुषर्षभः।
विज्वरो विगतामर्षो हतं रक्षो ह्युदैक्षत॥ **7.65.14** ॥

निरीक्षमाणं तं दृष्ट्वा सहायं तस्य रक्षसः।
सन्तापमकरोद् घोरं सौदासं चेदमब्रवीत्॥ **7.65.15** ॥

यस्मादनपराधं तं सहायं मम जघ्निवान्।
तस्मात् तवापि पापिष्ठ प्रदास्यामि प्रतिक्रियाम्॥ **7.65.16** ॥

एवमुक्त्वा तु तद् रक्षस्तत्रैवान्तरधीयत।
कालपर्याययोगेन राजा मित्रसहोऽभवत्॥ **7.65.17** ॥

राजापि यजते यज्ञमस्याश्रमसमीपतः।
अश्वमेधं महायज्ञं तं वसिष्ठोऽप्यपालयत्॥ **7.65.18** ॥

तत्र यज्ञो महानासीद् बहुवर्षगणायुतः।
समृद्धः परया लक्ष्म्या देवयज्ञसमोऽभवत्॥ **7.65.19** ॥

अथावसाने यज्ञस्य पूर्ववैरमनुस्मरन्।
वसिष्ठरूपी राजानमिति होवाच राक्षसः॥ **7.65.20** ॥

अद्य यज्ञावसानान्ते सामिषं भोजनं मम।
दीयतामतिशीघ्रं वै नात्र कार्या विचारणा॥ **7.65.21** ॥

तच्छ्रुत्वा व्याहृतं वाक्यं रक्षसा ब्रह्मरूपिणा।
सूदान् संस्कारकुशलानुवाच पृथिवीपतिः॥ **7.65.22** ॥

हविष्यं सामिषं स्वादु यथा भवति भोजनम्।
तथा कुरुत शीघ्रं वै परितुष्येद् यथा गुरुः॥ **7.65.23** ॥

शासनात् पार्थिवेन्द्रस्य सूदः सम्भ्रान्तमानसः।
तच्च रक्षः पुनस्तत्र सूदवेषमथाकरोत्॥ **7.65.24** ॥

स मानुषमथो मासं पार्थिवाय न्यवेदयत्।
इदं स्वादु हविष्यं च सामिषं चान्नमाहृतम्॥ **7.65.25** ॥

स भोजनं वसिष्ठाय पत्न्या सार्धमुपाहरत्।
मदयन्त्या नरश्रेष्ठ सामिषं रक्षसा हृतम्॥ **7.65.26** ॥

ज्ञात्वा तदामिषं विप्रो मानुषं भाजनं गतम्।
क्रोधेन महताविष्टो व्याहर्तुमुपचक्रमे॥ **7.65.27** ॥

यस्मात् त्वं भोजनं राजन् ममैतद् दातुमिच्छसि।
तस्माद् भोजनमेतत् ते भविष्यति न संशयः॥ **7.65.28** ॥

ततः क्रुद्धस्तु सौदासस्तोयं जग्राह पाणिना।
वसिष्ठं शप्तुमारेभे भार्या चैनमवारयत्॥ **7.65.29** ॥

राजन् प्रभुर्यतोऽस्माकं वसिष्ठो भगवानृषिः।
प्रतिशप्तुं न शक्तस्त्वं देवतुल्यं पुरोधसम्॥ **7.65.30** ॥

ततः क्रोधमयं तोयं तेजोबलसमन्वितम्।
व्यसर्जयत धर्मात्मा ततः पादौ सिषेच च॥ **7.65.31** ॥

तेनास्य राज्ञस्तौ पादौ तदा कल्माषतां गतौ।
तदाप्रभृति राजासौ सौदासः सुमहायशाः॥ **7.65.32** ॥

कल्माषपादः संवृत्तः ख्यातश्चैव तथा नृपः।
स राजा सह पत्न्या वै प्रणिपत्य मुहुर्मुहुः।
पुनर्वसिष्ठं प्रोवाच यदुक्तं ब्रह्मरूपिणा॥ **7.65.33** ॥

तच्छ्रुत्वा पार्थिवेन्द्रस्य रक्षसा विकृतं च तत्।
पुनः प्रोवाच राजानं वसिष्ठः पुरुषर्षभम्॥ **7.65.34** ॥

मया रोषपरीतेन यदिदं व्याहृतं वचः।
नैतच्छक्यं वृथा कर्तुं प्रदास्यामि च ते वरम्॥ **7.65.35** ॥

कालो द्वादशवर्षाणि शापस्यान्तो भविष्यति।
मत् प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि॥ **7.65.36** ॥

एवं स राजा तं शापमुपभुज्यारिसूदनः।
प्रतिलेभे पुना राज्यं प्रजाश्चैवान्वपालयत्॥ **7.65.37** ॥

तस्य कल्माषपादस्य यज्ञस्यायतनं शुभम्।
आश्रमस्य समीपेऽस्य यन्मां पृच्छसि राघव॥ **7.65.38** ॥

**तस्य तां पार्थिवेन्द्रस्य कथां श्रुत्वा सुदारुणाम्।**
**विवेश पर्णशालायां महर्षिमभिवाद्य च॥ 7.65.39॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चषष्टितमः सर्गः॥